परस्परानुरागेण जातिधर्म्माश्रितं वचः ॥३०।
सत्यं शस्तो राक्षसोऽपि क्षत्रियाणां परो विधिः ।
किन्त्वसौ जनकस्वाम्ये कुमार्य्यानुमतो वरः ॥३१।
हत्वा तु पितृसम्बन्धं बलेन ह्रियते हि या ।
स राक्षसो विधिः प्रोक्तो नान्यभर्त्तृकरे स्थिता ॥३२।
पश्यतां सर्व्वभूपानामनया यद्वृतो दमः ।
गान्धर्व्वस्येह निष्पत्तौ विवाहो राक्षसोऽत्र कः ॥३३।
विवाहितायाः कन्यायाः कन्यात्वं नैव विद्यते ।
कन्यायाश्च विवाहेन सम्बन्धः पृथिवीश्वराः ॥३४।
त इमे ये बलादेनां दमादादातुमुद्यताः ।
बलिनस्ते यदि ततः कुर्व्वन्तु न तु साधु तत् ॥३५।

मार्कण्डेय उवाच—

तच्छ्रुत्वाऽसौ दमः कोप-कषायीकृतलोचनः ।
आरोपयामास धनुर्वचनञ्चेदमब्रवीत् ॥३६।

मार्कण्डेय मुनि ने कहा—

पहिले जिन राजाओं ने परस्पर-अनुराग और जातिधर्मविषयक बातें कही थीं, उन्होंने फिर कहा ॥ ३० ॥ यह ठीक है कि, क्षत्रियों के लिये राक्षस विवाह ही प्रशस्त और श्रेष्ठ है। इस राजकन्या ने पिता के अधीन रहकर कुमारी अवस्था में दमको पतिरूप से स्वीकार किया है ॥ ३१ ॥ पितृपक्षको हत या आहत कर यदि कन्या का हरण किया जाय, तो वह राक्षसविवाह कहाता है। परन्तु पति के हाथ से बलपूर्वक हरण कर यदि कन्या लायी जाय, तो वह राक्षसविवाह नहीं हो सकता है ॥ ३२ ॥ समस्त भूपालों के सामने जब यह सुमना दमको वरण कर चुकी है, तब उसका गान्धर्वविवाह हो चुका। अब राक्षसविवाह विधि का प्रसङ्ग ही कहाँ है ॥ ३३ ॥ विवाहिता कन्या का कन्यात्व नहीं रह जाता है। हे नृपवृन्द ! विवाहतक ही कन्या का कन्यात्व है। जो बलपूर्वक दम से इसे छीनने को उद्यत हुए हैं, वे बल के गर्व में भरकर भले ही ऐसा करें, किंतु यह अच्छा कार्य नहीं है ॥ ३४-३५ ॥

मार्कण्डेय मुनि ने कहा—

इन सब बातों को सुनते सुनते दमकी आंखें क्रोध से लाल हो गयीं। उसने धनुष को चढ़ाते हुए यह वचन कहा ॥ ३६ ॥

ममापि भार्य्या बलिभिः पश्यतो ह्रियते यदि ।
तत्कुलेन भुजाभ्यां वा को गुणाः क्लीवजन्मनः ।।३७।
धिङ्ममास्त्राणि धिक् शौर्य्यं धिक् शरान् धिक् शरासनम्
धिग् व्यर्थं मे कुले जन्म मरुत्तस्य महात्मनः ।।३८।
यदि भार्यामिमे मूढाः समादाय बलान्विताः ।
प्रयान्ति जीवतो धिक् तां मम व्यर्थधनुष्मताम् ।।३९।
इत्युक्त्वा तान् महीपालान् महानन्दमुखान् बली ।
अथाब्रवीत् तदा सर्व्वान् महारिदमनो दमः ।।४०।

दम उवाच—

एषातिशोभना बाला चार्व्वङ्गी मदिरेक्षणा ।
किं तस्य जन्मना भार्य्या न यस्येयं कुलोद्भवा ।।४१।
इति सञ्चिन्त्य भूपालास्तथा यतत संयुगे ।
यथा निर्ज्जित्य मामेतां पत्नीं कुरुत मानिनः ।।४२।

मार्कण्डेय उवाच—

इत्याभाष्य ततस्तत्र शरवर्षममुञ्चत ।
छादयन् पृथिवीपालांस्तमसेव महीरुहान् ।।४३।

मेरी आंखों से देखते हुए मेरी भार्या का यदि कोई बलपूर्वक अपहरण करे, तो समझना होगा कि, क्लीव होकर मैं जन्मा हूँ मेरे कुल का गौरव और दोनों भुजाओं का फिर क्या महत्व रह जाता है ।। ३७ ।। मेरे जीते जी ये मूढ़ लोग बलोन्मत्त होकर मुझ से यदि मेरी भार्या को छीन ले जायँ, तो मेरे सब अस्त्र, शौर्य, शर और शरासन को धिक्कार है ! महात्मा मरुत्त के वंश में मेरे जन्मग्रहण करने को धिक्कार है। मेरे जीवन और धनुष्मत्ता को धिक्कार है ।। ३८-३९ ।।

['मनुष्यताम्' भी पाठ है। इस पाठ में मनुष्यता व्यर्थ है, यह अर्थ होगा।] इस प्रकार गरज कर कहने पर महारिदमन बलवान् दम ने महानन्द आदि राजाओं से कहा ।। ४० ।।

दम ने कहा—

हे सम्मानित भूपालो ! तुम प्रतिज्ञा कर लो कि, इस अति मनोरमा, मदिरेक्षणा, सत्कुलोद्भवा, सुन्दरी बालिका को जो अपनी पत्नी न कर ले, उसका जन्म ही व्यर्थ है और फिर संग्राम के लिए सन्नद्ध हो जाओ, जिससे मुझे पराजित कर तुम इसको ले जा सको ।। ४१-४२ ।।

मार्कण्डेय मुनि ने कहा—

यह कहकर दमने उन राजाओं पर ऐसी शरवर्षा करना आरम्भ की कि, अन्धकार से जैसे वृक्षसमूह आच्छन्न हो जाते हैं, वैसे उसके शरजाल से सब राजा ढँक गये ।। ४३ ।।

तेऽपि वीरा महीपालाः शर-शक्त्यृष्टि-मुद्गरान् ।
मुमूचुस्तत्प्रयुक्तांश्च दमश्चिच्छेद लीलया ॥४४॥
तेऽपि तत्प्रहितान् वाणांस्तेषाञ्चासौ शरोत्करान् ।
चिच्छेद पृथिवीशानां नरिष्यन्तात्मजो मुने ॥४५॥
वर्त्तमाने तदा युद्धे दमस्य क्षितिपात्मजैः ।
प्रविवेश महानन्दः खड्गपाणिर्यतो दमः ॥४६॥
तमायान्तं दमो दृष्ट्वा खड्गपाणिं महामृधे ।
मुमोच शरवर्षाणि वर्षाणीव पुरन्दरः ॥४७॥
तदस्त्राणि ततस्तानि शरजालानि तत्क्षणात् ।
महानन्दः प्रचिच्छेद खड्गेनान्यानवञ्चयत् ॥४८॥
ततो रोषात् समारुह्य तं दमस्य तदा रथम् ।
महानन्दो महावीर्य्यो दमेन युयुधे सह ॥४९॥
बहुधा युध्यमानस्य महानन्दस्य लाघवात् ।
दमो मुमोच हृदये शरं कालानलप्रभम् ॥५०॥
तं लग्नमात्मनोत्कृष्य विभिन्नेन ततो हृदि ।
दमं प्रति विचिक्षेप महानन्दोऽसिमुज्ज्वलम् ॥५१॥

उन महावीर महीपालों ने भी बाण, शक्ति, ऋष्टि, मुद्गर आदि का प्रयोग किया परन्तु उनके वे सभी शस्त्र दम ने खेल-खेल से छिन्न-भिन्न कर डाले ॥ ४४ ॥

हे मुने ! विपक्षी राजा जिस प्रकार दम के चलाये शस्त्रों को तोड़ते जाते थे, उसी प्रकार नरिष्यन्तपुत्र दम भी उनके चलाये शस्त्रास्त्रों को विफल करता था ॥ ४५ ॥ राजपूतों के साथ दमका इस प्रकार युद्ध हो रहा था कि, इतने में महानन्द हाथ में तलवार लेकर दम के सामने आया ॥४६॥

महारणक्षेत्र में खड्ग खींचकर महानन्द अपनी ओर आ रहा है, यह देखते ही, इन्द्र जैसे मेघ की वर्षा करता है, वैसे दम ने भी उस पर बाणों का ताँता बाँध दिया ॥४७॥

महानन्द ने उसके सब बाणों और शस्त्रों को क्षण भर में काट डाला । यह इतनी सफाई से किया कि, अन्य राजा इसे जान भी नहीं सके ॥४८॥

फिर महावीर महानन्द आवेश के साथ दम के रथपर ही चढ़कर उससे युद्ध करने लगा ॥४९॥

अनेक प्रकार से दोनों का युद्ध होने पर दमने बड़ी चतुरता से कालाग्नि के समान एक बाण महानन्द के हृदय में विद्ध किया ॥५०॥

महानन्द ने उस बाण को अपने हाथ से उखाड़ कर फेंक दिया और भिन्न-हृदय से ही अपने उज्ज्वल खड्ग का दम पर प्रहार किया ॥५१॥

पतन्तञ्चैनमुल्काभं शक्त्या चिच्छेद तं दमः ।
शिरो वेतसपत्रेण महानन्दस्य चाच्छिनत् ॥५२।
तस्मिन् हते महानन्दे प्राचुर्य्येण पराङ्मुखाः ।
बभूवुः पार्थिवास्तस्थौ वपुष्मान् कुण्डिनाधिपः ॥५३।
दमेन युयुधे चासौ बलगर्व्वमदान्वितः ।
दाक्षिणात्यमहीपाल-तनयो रणगोचरः ॥५४।
युध्यमानस्य तस्योग्रं करबालं स वै लघु ।
चिच्छेद सारथेश्चैव शिरः संख्ये तथा ध्वजम् ॥५५।
छिन्नखड्गो गदां सोऽथ जग्राह बहुकण्टकाम् ।
तामप्यस्य स चिच्छेद करस्थामेव सत्वरः ॥५६।
यावदन्यत् समादत्ते स वपुष्मान् वरायुधम् ।
तावच्छरेण तं विद्ध्वा दमो भूमावपातयत् ॥५७।
स पातितस्ततो भूमौ विह्वलाङ्गः सवेपथुः ।
विनिर्वृत्तमतिर्युद्धाद्बभूव क्षितिपात्मजः ॥५८।
तमालोक्य तथाभूतमयुद्धमतिमात्मवान् ।
उत्सृज्यादाय सुमनां सुमनाः प्रययौ दमः ॥५९।

उल्का के समान उस खड्ग का प्रहार होता है, न होता है, इतने में दमने उसे शक्ति नामक आयुध से दो टूक कर डाला उसी क्षण वेतसपत्र बाण के द्वारा महानन्द का सिर काट डाला ॥५२॥

महानन्द के मारे जाते ही अधिकांश नरपति युद्ध से पराङ्मुख हो गये; केवल कुण्डिनाधिपति वपुष्मान् ही रणक्षेत्र में डँटा रहा। वह बल-गर्वसे उन्मत्त दाक्षिणात्य भूपाल वपुष्मान् संग्राम में अटल रह कर दम से युद्ध करने लगा ॥५३-५४॥

उस युद्धयमान् वपुष्मान् का खड्ग, उसके सारथि का मस्तक और रथ का ध्वज दमने अपनी उग्र तलवार से क्षणभर में ही काट गिराया ॥५५॥

खड्ग के टूट जाने पर बहुत से कीलों से जड़ी हुई गदा वपुष्मान् ने तान ली। दम ने उस कर में स्थित गदा को ही शीघ्रता से काट डाला ॥५६॥

फिर जब तक वपुष्मान् कोई उत्कृष्ट शस्त्र ग्रहण करना चाहता है, तब तक दमने उसे बाणों से विद्ध कर, भूमि पर गिरा दिया ॥५७॥

राजपुत्र वपुष्मान् के भूमि पर गिरने पर उसके सब अङ्ग काँप रहे थे और वह छटपटा रहा था। अब उसने युद्ध की इच्छा त्याग दी थी। मनस्वी दमने उसे युद्ध से विरत देखकर उसी अवस्था में छोड़ दिया और सुमना को साथ लेकर प्रसन्न चित्त से वहाँ से प्रस्थान किया ॥५८-५९॥

ततो दशार्णाधिपतिः प्रीतिमानकरोत् तयोः ।
दमस्य सुमनायाश्च विवाहं विधिपूर्व्वकम् ॥६०॥
कृतदारो दमस्तत्र दशार्णाधिपतेः पुरे ।
स्थित्वाऽल्पकालं प्रययौ सभार्य्यो निजमन्दिरम् ॥६१॥
दशार्णाधिपतिश्चासौ दत्त्वा नागांस्तुरङ्गमान् ।
रथगोऽश्वखरोष्ट्रांश्च दासीदासांस्तथा बहून् ॥६२॥
वस्त्रालङ्कारचापादि वरोपस्करमात्मनः ।
अन्यैस्तैश्च तथा भाण्डैः परिपूर्णं व्यसर्ज्जयत् ॥६३॥

इति श्रीमार्कण्डेयपुराणे दमचरितवर्णनं नाम त्रयस्त्रिंशत्यधिकशततमोऽध्यायः ॥१३३॥

अनन्तर दशार्णाधिपति ने प्रीतिपूर्वक सुमना और दम का विवाह यथाविधि सम्पन्न किया ॥६०॥

विवाह हो जाने पर कुछ दिन तक दम दशार्णाधिपति के नगर में ठहरा और फिर नवपरिणीता पत्नी के साथ अपनी राजधानी में चला गया ॥६१॥

उसे विदा करते समय दशार्णाधिपति ने उसे बहुत से हाथी, तरह-तरह के घोड़े, रथ, गायें, खच्चर, ऊँट, दास, दासी, वस्त्र, अलङ्कार, धनुष आदि नानाविध बहुमूल्य सामग्रियाँ दहेज में दी और वर-वधू दोनोंको धन-रत्न आदि से पूर्ण कर विदा किया ॥६२-६३॥

इस प्रकार श्रीमार्कण्डेयपुराण का दमचरितान्तर्गत सुमनास्वयंवर नामक एक सौ तैंतीसवें अध्याय का हिन्दी अनुवाद सम्पूर्ण हुआ।



चतुस्त्रिशत्यधिकशततमोऽध्यायः

मार्कण्डेय उवाच—

स तां लब्ध्वा तथा पत्नीं सुमनां सुमहामुने ।
प्रणम्य स पितुः पादौ मातुश्च क्षितिपात्मजः ॥१।
सा च तौ श्वशुरौ सुभ्रूर्ननाम सुमना तदा ।
ताभ्यां तौ च तदा विप्र आशोभिरभिनन्दितौ ॥२।
महोत्सवश्च सञ्जज्ञे नरिष्यन्तस्य वै पुरे ।
कृतदारे च सम्प्राप्ते दशार्णाधिपतेः पुरात् ॥३।
सम्बन्धिनं दशार्णेशं जितांश्च पृथिवीश्वरान् ।
श्रुत्वा पुत्रेण मुमुदे नरिष्यन्तो महीपतिः ॥४।
सोऽपि रेमे सुमनया महाराजसुतो दमः ।
वरोद्यान-वनोद्देश-प्रासाद-गिरिसानुषु ॥५।
अथ कालेन महता रममाणा दमेन सा ।
अवाप गर्भं सुमना दशार्णाधिपतेः सुता ॥६।
सोऽपि राजा नरिष्यन्तो भुक्तभोगो महीपतिः ।
वयःपरिणतिं प्राप्य दमं राज्येऽभिषिच्य च ॥७।

मार्कण्डेय मुनि ने कहा :—

हे महामुने ! राजपुत्र दमने सुमना को पत्नी रूप से प्राप्त कर पिता-माता की चरणवन्दना की और फिर सुभ्रू सुमना ने भी सास-ससुर की वन्दना की। हे विप्र ! उन्होंने भी दोनों का आशीर्वचनों से अभिनन्दन किया ॥१-२॥

विवाह करके दशार्णाधिपति के नगर से दम के लौट आने पर नरिष्यन्तपुर में महोत्सव प्रारम्भ हुआ ॥३॥

दशार्णेश्वर के साथ हुए वैवाहिक सम्बन्ध तथा अपने पुत्र के द्वारा हुए अनेक नृपतियों के पराजय की वार्ता सुनकर महीपति नरिष्यन्त को बड़ी ही प्रसन्नता हुई ॥४॥

फिर राजपुत्र दम विचित्र उद्यानों, वनप्रदेशों, प्रासादों और पर्वतशिखरों जैसे स्थानों में सुमना के साथ विहार करने लगा। दम के साथ विहार करते हुए कुछ समय बीतने पर दशार्णराज की कन्या सुमना ने गर्भ धारण किया ॥५-६॥

महीपति नरिष्यन्त ने अनेक भोगों का उपभोग करने के पश्चात् अपनी अधिक अवस्था को देखकर दमको राज्याभिषिक्त किया और स्वयं यशस्विनी पत्नी इन्द्रसेना

वनं जगामेन्द्रसेना पत्नी चास्य यशस्विनी ।
वानप्रस्थविधानेन स तत्र समतिष्ठत ।।८।

दाक्षिणात्यः सुदुर्वृत्तः संक्रन्दनसुतो वने ।
वपुष्मान् स मृगान् हन्तुं ययावल्पपदानुगः ।।९।

स तं दृष्ट्वा नरिष्यन्तं तापसं मलपङ्किनम् ।
इन्द्रसेनाञ्च तत्पत्नीं तपसातिसुदुर्ब्बलाम् ।।१०।

पप्रच्छ कस्त्वं भो विप्रः क्षत्रियो वा वनेचरः ।
वानप्रस्थमनुप्राप्तो वैश्यो वा मम कथ्यताम् ।।११।

ततो मौनव्रती भूपो न हि तस्योत्तरं ददौ ।
इन्द्रसेना च तत् सर्व्वमाचष्टास्मै यथातथम् ।।१२।

मार्कण्डेय उवाच—

ज्ञात्वा तञ्च नरिष्यन्तं वपुष्मान् पितरं रिपोः ।
प्राप्तोऽस्मीति वदन् कोपात् जटासु परिगृह्य च ।।१३।

हा हेति चेन्द्रसेनायां रुदन्त्यां वाष्पगद्गदम् ।
चकर्ष कोपात् खड्गञ्च वाक्यञ्चेदमुवाच ह ।।१४।

को साथ लेकर वनमें चला गया और वहीं वे दोनों वानप्रस्थ धर्मका पालन करते हुए निवास करने लगे ।।७-८।।

एक बार दाक्षिणात्य राजा संक्रन्दनका पुत्र दुराचारी वपुष्मान् कुछ सेवकों के साथ मृगया करता हुआ उस वन में उपस्थित हुआ। वहाँ उसने देह में भस्म लेपन किये हुए तपस्वी नरिष्यन्त और तप से कृश हुई इन्द्रसेना को देखकर जिज्ञासा की कि, आप कौन हैं ? और ब्राह्मण, क्षत्रिय, वैश्य इन त्रिवर्णों में से कौन हैं, जो वानप्रस्थ को अवलम्बन करके वनवासी हो रहे हैं ? भूपति ने मौनव्रत ग्रहण किया था, इस कारण उसने तो कोई उत्तर नहीं दिया; किन्तु इन्द्रसेनाने उसे अपना सारा वृत्तान्त कह सुनाया ॥९-१२॥

मार्कण्डेय मुनि ने कहा :—

वपुष्मान् ने, उसे अपने शत्रु का पिता नरिष्यन्त यही है यह जानकर, "अब कहाँ जाता है ?—पा गया" कहते हुए क्रोध से उसकी जटाएँ पकड़ लीं ॥१३॥

तब इन्द्रसेना हाहाकार करती हुई रुँधे कण्ठ से रोने लगी। परन्तु उस दुराचारी ने उधर ध्यान न देकर म्यान से तलवार खींचकर क्रोध से यह कहा ॥१४॥

निर्ज्जितः समरे येन येन मे सुमना हृता ।
दमस्य तस्य पितरं हनिष्येऽवतु तं दमः ॥१५॥
येनाखिलमहीपाल-पुत्राः कन्यार्थमागताः ।
अवधूता हनिष्येऽहं पितरं तस्य दुर्म्मतेः ॥१६॥
योधनेषु स्वरूपेण दमो यस्य दुरात्मनः ।
स दमो वारयत्वेष हन्मि तस्य रिपोर्गुरुम् ॥१७॥

मार्कण्डेय उवाच—

इत्युक्त्वा स दुराचारो वपुष्मानवनीपतिः ।
क्रन्दन्त्यामिन्द्रसेनायां शिरश्चिच्छेद तस्य च ॥१८॥
ततो धिग्धिङ्मुनिजना अन्ये च वनवासिनः ।
तमूचुः स च तं दृष्ट्वा जगाम स्वपुरं वनात् ॥१९॥
गते तस्मिन् विनिश्वस्य सेन्द्रसेना वपुष्मति ।
प्रेषयामास पुत्रस्य समीपं शूद्रतापसम् ॥२०॥
गच्छेथा आशु मे पुत्रं दमं ब्रूहि वचो मम ।
अभिज्ञो ह्यसि मद्भर्त्तृ-वृत्तान्तं प्रोच्यतेऽत्र किम् ॥२१॥

जिसने मुझे समराङ्गण में पराजित किया था, उसी दम के पिता का आज मैं वध करता हूँ; दम आकर मुझसे इसको बचावे ॥१५॥

कन्या-प्राप्ति के लिये आये हुए सभी राजपूतों को जिसने अपमानित किया था, उस दुर्मति दम के पिता को आज मैं मार रहा हूँ। जो दुरात्मा स्वभावतः योधाओं का दमन करने वाला है, आज उसी शत्रु के पिता का मैं संहार कर रहा हूँ, दम आकर इसकी रक्षा करे ॥१६-१७॥

मार्कण्डेय मुनि ने कहा :—

यह कह कर दुरात्मा राजा वपुष्मान् ने रोती हुई इन्द्रसेना के सामने ही तलवार से नरिष्यन्त का सिर काट लिया ॥१८॥

तब सब मुनिगण और अन्यान्य वनवासी लोग उस हत्यारे को धिक्कारने लगे। नरिष्यन्त का इस प्रकार निधन कर वपुष्मान् अपने नगर को लौट गया ॥ १९ ॥

उसके चले जानेपर इन्द्रसेना ने गहरी साँस भरकर एक शूद्र तापस को अपने पुत्र के पास भेजा ॥ २० ॥

उससे उसने कहा कि, मेरे पुत्र दम से यहाँ का सब समाचार कहना। मेरे स्वामी का सब वृत्तान्त तुम जानते हो; अतः इस सम्बन्ध में अधिक कुछ समझाने की आवश्यकता नहीं है ॥ २१ ॥

तथापि वाच्यः पुत्रो मे यद्ब्रवीम्यतिदुःखिता ।
लङ्घनामीदृशीं प्राप्तां विलोक्यैतां महीपतेः ॥२२॥
स भर्त्ताऽधिकृतो राजा चतुर्णां परिपालकः ।
त्वमाश्रमाणां किं युक्तं तापसान् यन्न रक्षसि ॥२३॥
भर्त्ता मम नरिष्यन्तस्तापसस्तपसि स्थितः ।
विलपन्त्यास्तथानाथो यथा नास्ति तथा त्वयि ॥२४॥
आकृष्य केशेषु बलादपराधं विना ततः ।
हतो वपुष्मता ख्यातिमिति ते भूपतिर्गतः ॥२५॥
एवं स्थिते तत् क्रियतां यथा धर्म्मो न लुप्यते ।
तथा च नैव वक्तव्यमतोऽस्मात् तापसी ह्यहम् ॥२६॥
पिता वृद्धस्तपस्वी च नापराधेन दूषितः ।
निहतो येन यत् तस्य कर्त्तव्यं तद्विचिन्त्यताम् ॥२७॥
सन्ति ते मन्त्रिणो वीराः सर्व्वशास्त्रार्थकोविदाः ।
तैः सहालोच्य यत् कार्य्यमेवम्भूते कुरुष्व तत् ॥२८॥
नास्माकमधिकारोऽत्र तापसानां नराधिप ! ।
कुरुष्वैतदितीत्थं त्वमेवं भूपतिभाषितम् ॥२९॥

फिर भी महीपति की यह अपमानजनक अवस्था देखकर मैं अत्यन्त दुःखित होकर जो कुछ कहती हूँ, वह तुम मेरी ओर से मेरे पुत्र से कहना कि, वत्स ! तुम राजा हो। चारों आश्रमों के लोगों के प्रतिपालक रूप से तुम नियुक्त हुए हो। परन्तु तुम तपस्वियों की रक्षा नहीं कर पाते, क्या यह तुम्हारे योग्य है ? मेरे पतिदेव नरिष्यन्त तपस्वी होकर तपस्या कर रहे थे। रक्षाकर्ता रूप से तुम्हारे विद्यमान रहते हुए अनाथ की तरह बिना अपराध के उनके केश पकड़ कर मेरा विलाप सुनते हुए वपुष्मान् ने उनका वध कर डाला है। तुम्हारे सम्बन्ध में यही प्रसिद्धि होगी कि, तुम्हारे राजा होते हुए यह कार्य हुआ। ऐसी अवस्था में जिससे धर्म का लोप न हो, ऐसा उपयुक्त कार्य करो। मैं तपस्विनी हूँ, इससे अधिक कुछ कहना मेरे लिए उचित नहीं है। तुम्हारे पिता प्रथम तो वृद्ध थे, दूसरे वे तपस्या कर रहे थे; अतः किसी अपराध से भी किसी के निकट अपराधी नहीं थे। फिर भी जिसने उनका प्राणनाश किया, उसके सम्बन्ध में इस समय तुम्हें क्या करना चाहिए, इसका विशेष रूप से तुम विचार करो। तुम्हारे मन्त्रिगण शास्त्रवेत्ता और वीर हैं। उनसे इस विषय में परामर्श कर अब जो कुछ उचित हो वह करो ॥ २२-२८ ॥

महाराज नरिष्यन्त ने अन्त समय में कहा कि—"मैं तापस हूँ, मुझे इस विषय में कुछ भी कहने का अधिकार नहीं है, तुम ही इस पर विचार करो" ॥ २९ ॥

विदूरथस्य जनको यवनेन यथा हतः।
तथायं तव पुत्रस्य कुलं तेन विनाशितम् ॥३०॥
जम्भस्यासुरराजस्य पिता दष्टो भुजङ्गमैः।
तेनाप्यखिलपाताल-वासिनः पन्नगा हताः ॥३१॥
पराशरेण पितरं शक्तिञ्च रक्षसा हतम्।
श्रुत्वाऽग्नौ पातितं कृत्स्नं रक्षसामभवत् कुलम् ॥३२॥
अन्यस्यापि स्ववंशस्य लङ्घना क्रियते हि या।
तां नालं क्षत्रियः सोढुं किं पुनः पितृमारणम् ॥३३॥
नायं पिता ते निहतो नास्मिन् शस्त्रं निपातितम्।
त्वामत्र निहतं मन्ये त्वयि शस्त्रं निपातितम् ॥३४॥
बिभेत्यस्य हि कः शस्त्रं न्यस्ते येन वनौकसाम्।
तव भूपस्य पुत्रस्य मारिते तु बिभेतु वा ॥३५॥
तवेयं लङ्घना युक्ता यदस्मिंस्तत् समाचर।
वपुष्मति महाराज सभृत्य-ज्ञाति-बान्धवे ॥३६॥

हे पुत्र ! विदूरथ का पिता जिस प्रकार यवनों के द्वारा मारा गया था, उसी प्रकार तुम्हारे पिता को मारकर वपुष्मान् ने तुम्हारे कुल का विनाश किया है ॥३०॥

असुरराज जम्भ का पिता सर्प के काटने से मरा था, इस कारण जम्भ ने समस्त पातालवासी पन्नगों को मार डाला था ॥ ३१ ॥

पराशर का पिता शक्ति राक्षस के द्वारा मारा गया था, इस कारण पराशर ने समस्त राक्षसकुलों को आग में जला दिया था ॥ ३२ ॥

स्ववंशीय किसी अन्य व्यक्ति का अपमान होने पर भी क्षत्रिय उसे सह नहीं सकते, फिर साक्षात् पिता के वध के सम्बन्ध में कहना ही क्या है ॥ ३३ ॥

मेरी समझ में तुम्हारे पिता निहत नहीं हुए हैं और न उनपर शस्त्राघात ही हुआ है। यह तो तुम ही मारे गये हो और तुम्हीं पर शस्त्रप्रहार किया गया है ॥ ३४ ॥

जो व्यक्ति वनवासियों पर शस्त्र चलाता है, उससे कौन डरता है ? उसका पौरुष ही क्या है ? वह पापी है। तुम अपने पिता के सुपुत्र और राजा हो। तुम यदि शत्रुओं को नष्ट करो, तो सभी तुमसे डरने लगेंगे। यदि ऐसा नहीं हुआ, तो तुमसे कोई नहीं डरेगा और तुम्हारे राज्यशासन कार्य में भी बाधा पड़ेगी। तुम्हारा ही यह अपमान हुआ है। अतः हे महाराज ! वपुष्मान् के सम्बन्ध में भृत्य, जाति और बान्धवों के साथ जो कुछ करना हो, करो ॥ ३५-३६ ॥

मार्कण्डेय उवाच—

इति संक्रान्तसन्देशमिन्द्रसेना विसृज्य तम् ।
पतिदेहमुपाश्लिष्य विवेशाग्निं मनस्विनी ॥३७॥

इति श्रीमार्कण्डेयपुराणे दमचरित्रवर्णनं नाम चतुस्त्रिंशत्यधिकशततमोऽध्यायः ॥१३४॥

मार्कण्डेय मुनि ने कहा :—

मनस्विनी इन्द्रसेना ने इस प्रसक्त सन्देश को उससे कह कर उसे विदा किया और फिर पति के शरीर को आलिङ्गन कर अग्नि में प्रवेश किया ॥३७॥

इस प्रकार श्रीमार्कण्डेयपुराण का दमचरित सम्बन्धी एक सौ चौंतीसवें अध्याय का हिन्दी अनुवाद सम्पूर्ण हुआ ।



पञ्चत्रिंशत्यधिकशततमोऽध्यायः

मार्कण्डेय उवाच—

इन्द्रसेनासमाज्ञप्तः स गत्वा शूद्रतापसः ।
समाचष्टे यथाप्रोक्तं दमाय निधनं पितुः ॥१॥
तापसेन समाख्याते दमस्तेन पितुर्वधे ।
क्रोधेनातीव जज्वाल हविषेवाग्निरुद्धतः ॥२॥
स तु क्रोधाग्निना धीरो दह्यमानो महामुने ।
करं करेण निष्पिष्य वाक्यमेतदुवाच ह ॥३॥
अनाथ इव मे तातो मयि पुत्रे तु जीवति ।
घातितः सुनृशंसेन परिभूय कुलं मम ॥४॥
न्यायवादो जने तस्याप्येष क्लैव्यात् क्षमाम्यहम् ।
दुर्वृत्तशान्तौ शिष्टानां पालनेऽधिकृता वयम् ।
पितरं चापि निहतं दृष्ट्वा जीवन्ति शत्रवः ॥५॥
तत् किमेतेन बहुना हा तातेति च किं पुनः ।
विलापेनात्र यत् कृत्यं तदेषोऽत्र करोम्यहम् ॥६॥

मार्कण्डेय मुनि ने कहा—

इन्द्रसेना का संदेश लेकर शूद्र तापस दम के पास गया और उसे पिता के निधन का समाचार जिस रूप से घटित हुआ था तथा राज्ञी इन्द्रसेना का संदेश उसने कह सुनाया ॥१॥

तपस्वी पिता के वध का वृत्तान्त आद्योपान्त सुनकर घृताहुति से अग्नि जैसे अधिक प्रज्वलित हो जाती है, उसी प्रकार दम भी क्रोध से जल उठा ॥२॥

हे महामुने ! उसके स्वभावतः वीर होते हुए भी क्रोधानल से जल उठने के कारण हाथ पर हाथ रगड़ कर वह बोला ॥३॥

मुझ पुत्र के जीवित रहते हुए मेरे वंश के लिए अपमान जनक अनाथ की तरह मेरे पिता का उस नृशंस ने वध कर दिया ॥ ४ ॥

मैं अवश्य ही दुष्टों का दमन तथा शिष्टों का पालन करने के लिए नियुक्त हुआ हूँ। परन्तु जब कि, मेरे पिता निहित हो गये हैं और यह जानते हुए भी मेरे शत्रु जी रहे हैं, तब नपुंसक की तरह मैं उन्हें क्षमा कर रहा हूँ, यही लोग कहेंगे और यह जनापवाद ठीक भी होगा। अन्ततः अधिक बकवाद करने अथवा 'हा तात !' कहकर

यद्यहं तस्य रक्तेन देहोत्थेन वपुष्मतः ।
न करोमि गुरोस्तृप्तिं तत् प्रवेक्ष्ये हुताशनम् ॥७॥

तच्छोणितेनोदककर्म तस्य
तातस्य संख्ये विनिपातितस्य ।
मांसेन सम्यग्द्विजभोजनञ्च
न चेत् प्रवेक्ष्यामि हुताशनं तत् ॥८॥

साहाय्यमस्यासुर-देव-यक्ष-
गन्धर्व-विद्याधर-सिद्धसङ्घाः ।
कुर्वन्ति चेत् तानपि चास्त्रपूगै-
र्भस्मीकरोम्येष रुषा समेतः ॥९॥

निःशूरमाधर्मिकमप्रशस्तं
तं दाक्षिणात्यं समरे निहत्य ।
भोक्ष्ये ततोऽहं पृथिवीञ्च कृत्स्नां
वह्निं प्रवेक्ष्याम्यनिहत्य तं वा ॥१०॥

सुदुर्मतिं तापसवृद्धमौनिनं
वनस्थितं शान्तवचोविविग्नम् ।

विलाप करने से ही क्या होना है ? इस समय मेरा जो कर्त्तव्य है, वही मैं करूँगा । यदि मैं वपुष्मान् के शरीर के रक्त से पिता का तर्पण न करूँ, तो अवश्य ही अग्नि में प्रवेश करूँगा ॥ ५-७ ॥

युद्ध में उसे मारकर, उसके शोणित से मृत पिता का तर्पण कर, उसका मांस यदि चील-कौओं को न खिला दूँ, तो मैं आग में जलकर मर जाऊँगा ॥ ८ ॥

असुर, देव, गन्धर्व, यक्ष, विद्याधर और सिद्धगण भी यदि उसकी सहायता करें, तो उन्हें भी उसी क्षण क्रोधपूर्वक अस्त्र की अग्नि से भस्मीभूत कर दूँगा ॥ ९ ॥

उस शौर्यहीन, अधार्मिक और निन्दित दाक्षिणात्यको समर में मारकर ही समग्र पृथिवी का उपभोग करूँगा और यदि उसे न मार सका, तो अग्नि में प्रवेश करूँगा ॥ १० ॥ मेरे वनवासी, मौनव्रती, तपोनिरत वृद्ध पिता के उद्विग्न होकर शान्त वचन कहने पर भी जिस दुर्मति ने उनकी हत्या की है, मैं आज अपने सब बन्धुओं,

हन्ताऽहमद्याखिलबन्धुमित्र-
पदाति-हस्त्यश्व-बलैः समेतम् ॥११॥
एषोऽहमादाय धनुः सखड्गो
रथी तथैवारिबलं समेत्य ।
करोमि वै यत् कदनं समस्ताः
पश्यन्तु मे देवगणाः समेताः ॥१२॥
यो यः सहायो भविताद्य तस्य
मया समेतस्य रणाय भूयः ।
तस्याशु निःशेषकुलक्षयाय
समुद्यतोऽहं निजबाहुसैन्यः ॥१३॥
यदि कुलिशकरोऽस्मिन् संयुगे देवराजः
पितृपतिरथ चोग्रं दण्डमुद्यम्य कोपात् ।
धनपति-वरुणार्का रक्षितुं तं यतन्ते
निशितशरवरौघैर्घातयिष्ये तथापि ॥१४॥

मित्रों, पदातियों, हाथियों, घोड़ों और सेनाको साथ लेकर उसे रण में मार गिराऊँगा ॥ ११ ॥

आज मैं खड्ग और धनुष हाथ में लेकर, रथ में सवार होकर और शत्रुसैन्य में उपस्थित होकर उनका जैसा संहार करूँगा, उसे समस्त देवगण अवलोकन करें ॥ १२ ॥

जब उससे मेरा युद्ध छिड़ जायगा, तब उसके ज़ो सहायक होंगे, उनका भी इन बाहुरूपी सेनाओं द्वारा उसी क्षण निःशेषरूप से वंशक्षय करने पर मैं तुल गया हूँ ॥ १३ ॥

इस युद्धस्थल में हाथ में वज्र लेकर इन्द्र, उग्र, दण्ड लेकर क्रुद्ध यम, कुबेर, वरुण और सूर्य भी यदि उसकी रक्षा करने आवें, तो भी तीखे बाणों के द्वारा मैं उस वपुष्मान् का विनाश किये विना न रहूँगा ॥ १४ ॥

नियतमतिरदोषः काननाखण्डलौको-
निपतितफलभक्षः सर्वभूतेषु मैत्रः ।
प्रभवति मयि पुत्रे हिंसितो येन तातः
पिशितरुधिरतृप्तास्तस्य सन्त्वद्य गृध्राः ॥१५॥

इति श्रीमार्कण्डेयपुराणे दमचरित्रवर्णनं नाम पञ्चत्रिंशत्यधिकशततमोऽध्यायः॥१३५॥

मुझ प्रतापशाली पुत्र के जीवित रहते हुए जिसने मेरे संयतचित्त, निर्दोष, वनवासी वृक्ष से स्वाभाविक रूप से गिरे हुए फल खाकर जीवन धारण करनेवाले और सब प्राणियों से प्रेम करनेवाले पिताकी हत्या की है, आज उसके रक्त और मांस से गृद्धों के झुण्ड तृप्ति लाभ करें ॥ १५ ॥

इस प्रकार श्रीमार्कण्डेयपुराण का दमचरित सम्बन्धी एक सौ पैंतीसवें अध्याय का हिन्दी अनुवाद सम्पूर्ण हुआ ।



षट्त्रिंशत्यधिकशततमोऽध्यायः

मार्कण्डेय उवाच—

इति प्रतिज्ञाय तदा नरिष्यन्तसुतो दमः ।
कोपामर्षविवृत्ताक्षः श्मश्रुमावृत्य पाणिना ॥१॥
हा हतोऽस्मीति पितरं ध्यात्वा दैवं विनिन्द्य च ।
प्रोवाच मन्त्रिणः सर्व्वानानिनाय पुरोहितम् ॥२॥

दम उवाच—

यदद्य युक्तं तद् ब्रूत ताते प्राप्ते सुरालयम् ।
श्रुतं भवद्भिर्यत् प्रोक्तं तेन शूद्रतपस्विना ॥३॥
वृद्धस्तपस्वी स नृपो वानप्रस्थे व्रते स्थितः ।
मौनव्रतधरः शास्ता मन्मात्रा चेन्द्रसेनया ॥४॥
प्रोक्तं संपृष्टया सर्व्वं तथा तथ्यं वपुष्मते ।
स च खड्गं समाकृष्य तथा सव्येन पाणिना ॥५॥
कृत्वा जघान दुष्टात्मा लोकनाथमनाथवत् ।
माता च मां समुद्दिश्य धिक् शब्दं कुर्वती सती ॥६॥
मन्दभागं गतश्रीकं प्रविष्टा हव्यवाहनम् ।
समालिङ्ग्य नरिष्यन्तं प्रविष्टा त्रिदशालयम् ॥७॥

मार्कण्डेय मुनि ने कहा :—

नरिष्यन्तपुत्र दम इस प्रकार प्रतिज्ञा कर क्रोध से आँखें तरेर कर मोछोंपर हाथ फेरता हुआ 'हा हतोस्मि !' कहकर पिता के विषय में खेद और अपने भाग्य की निन्दा करने लगा, पुरोहितों और मन्त्रियों को बुलाकर उनसे कहा ॥ १-२ ॥

दम ने कहा :—

पिताजी स्वर्ग सिधार गये हैं। शूद्र तापस ने जो कुछ कहा, वह तुम्हें ज्ञात हो गया है। अब मुझे क्या करना चाहिये, कहें ॥ ३ ॥

सब लोकों के शास्ता उस नृपवर ने वृद्धावस्था में वानप्रस्थ व्रत ग्रहण कर तपश्चर्या करते हुए मौनव्रत का अवलम्बन किया था और वपुष्मान् के पूछने पर माता इन्द्रसेना ने उसे अपना सारा सच्चा परिचय दिया था। तब उस दुरात्माने तलवार खींचकर बायें हाथ से उनके केश पकड़ कर अनाथ की तरह उनको काट डाला। मैं नितान्त तेजोहीन और अभागा हूँ। मेरी सती माता ने मुझे धिक्कार करते हुए पिता नरिष्यन्तको गोद में लेकर चितापर आरोहण कर स्वर्ग में प्रवेश किया है ॥ ४-७ ॥

सोऽहमद्य करिष्यामि यन्मे मातुरुदीरितम् ।
हस्त्यश्वरथपादातं सैन्यश्च परिकल्पताम् ॥८॥
अनिवार्य्यं पितुर्वैरमहत्वा पितृघातकम् ।
अकृत्वा च वचो मातुर्जीवितुं किमिहोत्सहे ॥९॥

मार्कंण्डेय उवाच—

मन्त्रिणस्तद्वचः श्रुत्वा हा हेत्युक्त्वा तथा च तत् ।
कृतवन्तो विमनसः सभृत्यबलवाहनाः ॥१०॥
निर्ययुः सपरीवाराः खड्गशक्त्यर्ष्टिपाणयः ।
गृहीत्वा चाशिषो विप्रात् त्रिकालज्ञात् पुरोधसः ॥११॥
अहिराडिव निःश्वस्य दमः प्रायाद्वपुष्मतम् ।
सीमापालादिसामन्तान् निघ्नन् याम्यदिशि त्वरन्॥१२॥
सक्रन्दनसुतेनापि दमो ज्ञातो वपुष्मता ।
आयातः सपरीवारः सामात्यः सपरिच्छदः ॥१३॥
अकम्पितेन मनसा स्वसैन्यान्यादिदेश ह ।
दूतं च प्रेषयामास निर्गम्य नगराद्बहिः ॥१४॥
त्वं शीघ्रतरमागच्छ नरिष्यन्तः प्रतीक्षते ।
सभार्य्यः क्षत्रबन्धो त्वं समायाहि ममान्तिकम् ॥१५॥

माता ने मेरे पास जैसा संदेश भेजा है, मैं वैसा ही करूँगा। हाथी, घोड़े, रथ और पदातियों की चतुरङ्गिणी सेना सुसज्जित हो ॥ ८ ॥

पिता के वैरका बदला बिना चुकाये, पिता के हत्यारे का विनाश किये और माताकी आज्ञा का पालन किये बिना मुझे जीने का अधिकार ही क्या है ॥ ९ ॥

मार्कण्डेय मुनि ने कहा :—

दमकी बातें सुनकर मन्त्रियों ने हाहाकार करते हुए शोक प्रकाश किया और विमनस्क भाव से राजाकी आज्ञा के अनुसार कार्य सम्पादन किया। राजा भी भृत्य, सैन्य, वाहन, खड्ग, शक्ति, ऋष्टि आदि से सुसज्जित हो, सपरिवार युद्ध के लिये चल पड़ा। चलते समय उसने त्रिकालज्ञ ब्राह्मण पुरोहितों से आशीर्वाद ग्रहण किये थे। (राजाप्रासाद से निकलकर) शेषनाग की तरह निःश्वास परित्याग करता और सीमापालादि सामन्तों को मारता काटता, दम वपुष्मान् के राज्य में घुस गया ॥ १०-१२ ॥

सायुध, सशस्त्र, सपरिवार मन्त्रियों के साथ योधा के रूप में दम दाक्षिणात्य राज्य पर चढ़ आया है, यह समाचार पाकर संक्रन्दनपुत्र वपुष्मान् विचलित नहीं हुआ, उसने अपनी सेनाको युद्ध के लिये प्रस्तुत हो जाने का आदेश दिया और राजधानी के बाहर आकर दम के पास दूत भेजकर सूचना दी कि, रे क्षत्रियाधम ! आ, शीघ्रता से चला आ ! नरिष्यन्त अपनी भार्या के साथ तेरी प्रतीक्षा कर रहा है। इसलिये तू मेरे पास शीघ्रता से दौड़ आ ॥ १३-१५ ॥

एतें मद्बाहुनिर्मुक्ताः पीता वाणाः शिलाशिताः ।
भित्त्वा शरीरं संग्रामे पास्यन्ति रुधिरं तव ॥१६।

मार्कण्डेय उवाच—

श्रुत्वा दमस्तु तत् सर्व्वं दूतप्रोक्तं ययौ त्वरन् ।
स्मृत्वा प्रतिज्ञां पूर्व्वोक्तां निश्वसन्नुरगो यथा ॥१७।
आहूय समरे चैनं पुमान् स न विकत्थते ।
ततो युद्धमतीवासीद्दमस्य च वपुष्मतः ॥१८।
रथी च रथिना नागो हस्तिना हयिना हयी ।
अयूयुध्यत विप्रर्षे स युद्धस्तुमुलोऽभवत् ॥१९।
पश्यतां सर्वदेवानां सिद्धगन्धर्वयज्विनाम् ।
चकम्पे वसुधा ब्रह्मन् युध्यमाने दमे क्रुधा ॥२०।
न गजो न रथी नाश्वस्तस्य वाणसहस्तु यः ।
ततो दमेन युयुधे सेनाध्यक्षो वपुष्मतः ॥२१।
हृदि विव्याध च दम इषुणा गाढमन्तिके ।
तस्मिन् निपतिते सैन्यं पलायनपरं ययौ ।
सस्वामिकं ततः प्राह दमः , शमदमस्तथा ॥२२।

कितने ही वीरों का जिन्होंने रुधिर-पान किया है, ऐसे ये सानपर चढ़ाकर तीव्र किये हुए बाण रणाङ्गण में मेरे हाथ से छूटकर तेरे शरीरको फाड़कर तेरा रक्त पान करेंगे ॥ १६ ॥

मार्कण्डेय मुनि ने कहा :—

दम ने दूत का वचन सुनकर अपनी पूर्वप्रतिज्ञा का स्मरण किया और उरग की तरह साँसें भरता हुआ वह शीघ्रता से पैर बढ़ा कर वपुष्मान् को संग्राम के लिये ललकार कर बोला,—जो सच्चा पुरुष है, वह आत्मश्लाघा कभी नहीं करता। तदनन्तर दम और वपुष्मान् का घोर युद्ध आरम्भ हो गया। रथी से रथी, हाथी से हाथी और घुड़सवारों से घुड़सवार भिड़ने लगे। हे विप्रर्षे! सभी देवगण, सिद्ध, गन्धर्व और याज्ञिक लोग देख रहे थे और उन्हीं के सामने यह युद्ध हो रहा था। हे ब्रह्मन्! दम जब क्रोधपूर्वक युद्ध में प्रवृत्त हुआ, तब वसुन्धरा काँपने लगी ॥१७-२०॥

ऐसा कोई हाथी, घोड़ा या रथी नहीं था, जो उसके बाण को सह सकता तब वपुष्मान् का सेनापति दम के साथ युद्ध करने लगा ॥२१॥

किन्तु दमने बाण से उसका हृदय छेद डाला और वह यमपुरी चला गया। सेनापति के आहत होते हो (वपुष्मान्) और उसको सभी सेनाएँ रण-भूमि से भागने लगों। यह देखकर शत्रुओं की शान्ति का भङ्ग करने वाले दम ने स्वामी से कहा—॥२२॥

दम उवाच—

क्व याहि दुष्ट पितरं घातयित्वा तपस्विनम् ।
अशस्त्रञ्च तपस्यन्तं क्षत्रियोऽसि निवर्त्तताम् ॥२३।

मार्कण्डेय उवाच—

ततो निवर्त्त्य स दम्भो योधयामास सानुजः ।
सपुत्रः सह सम्बन्धि-बान्धवैर्युयुधे रथी ॥२४।
ततः शरासनान्मुक्तैर्वाणैर्व्याप्तं नभो दिशः ।
दमं च सरथं साश्वं वाणजालैरपूरयत् ॥२५।
ततः पितृवधोत्थेन कोपेन स दमस्तथा ।
चिच्छेद तान् शरांस्तेषां विव्याधाङ्गेषु तानपि ॥२६।
एकेनैकेन वाणेन सप्त पुत्रांस्तथानुजान् ।
सम्बन्धिनस्तथामित्राण्यनद्यमसादनम् ॥२७।
वपुष्मान् स रथी क्रोधान्निहतात्मजबान्धवः ।
युयुधे च दमेनाजौ शरैराशीविषोपमैः ॥२८।
चिच्छेद तस्य तान् वाणान् स चास्य च महामुने ।
युयुधातेऽतिसंरब्धौ परस्परवधैषिणौ ॥२९।

दम ने कहा :—

रे दुष्ट ! तूने मेरे शस्त्रविहीन, तपस्वी पिता की हत्या की है; अब कहाँ भागा जा रहा है । तू यदि क्षत्रिय है, तो लौट आ ॥२३॥

मार्कण्डेय मुनि ने कहा :—

फिर वपुष्मान् ने अनुज, पुत्र, सम्बन्धी और बान्धवों के साथ लौट कर रथ में चढ़कर फिर युद्ध आरम्भ किया । उस समय वपुष्मान् ने धनुष से वाणों का ताँता बाँधकर आकाश और दिशाओं को आच्छन्न कर दिया और दम को अश्वों तथा रथों सहित शरजाल से घेर लिया ॥२४-२५॥

पितृवध से क्रुद्ध हुए दम ने अपने बाणों से शत्रु के शरजाल को काट डाला और शत्रुओं के अङ्ग-प्रत्यङ्ग विच्छिन्न कर दिये ॥२६॥

फिर उसने एक-एक बाण से उसके सातों पुत्रों, अनुजों, सम्बन्धियों और मित्रों को काट-काट कर यमसदन में भेज दिया ॥२७॥

पुत्रों-मित्रों के हत होने के कारण वपुष्मान् और भी अधिक क्रुद्ध हो गया और साँपों की तरह बाणों की वर्षा करता हुआ दम के साथ युद्ध करने लगा ॥२८॥

उसके बाणों को दम और दम के बाणों को वह बराबर काटता जाता था । हे महामुने ! इस प्रकार अतिशय क्रोध में भरकर दोनों एक दूसरे के वध की इच्छा से दारुण युद्ध कर रहे थे ॥२९॥

परस्परशराघात-विच्छिन्नधनुषौ तथा ।
गृहीतखड्गावुत्तोर्यं चिक्रीडाते महाबलौ ॥३०।
दमः क्षणं नृपं ध्यात्वा निहतं पितरं वने ।
केशेष्वाकृष्य चाक्रम्य निपात्य धरणीतले ।
शिरोधरायां पादेन भुजमुद्यम्य चाब्रवीत् ॥३१।

दम उवाच—

पश्यन्तु देवताः सर्वा मानुषाः सिद्ध-पन्नगाः ।
पाटयमानं हि हृदयं क्षत्रबन्धोर्वपुष्मतः ॥३२।

मार्कण्डेय उवाच—

एवमुक्त्वा च स दमो हृदयं पाट्य चासिना ।
स्नातुकामैश्च स सुरैः क्षतजेन निवारितः ॥३३।
ततश्च कारितस्तस्य रक्तेनैवोदकक्रियाम् ।
वपुष्मतश्च मांसेन पिण्डदानं चकार ह ॥३४।
ब्राह्मणान् भोजयामास रक्षःकुलसमुद्भवान् ।
आनृण्यं प्राप्य स पितुः पुनः प्रायात् स्वकं पुरम् ॥३५।

लड़ते-लड़ते एक दूसरे के बाणों से दोनों के धनुष टूट गये। तब दोनों ने तलवारें खींचकर युद्ध-क्रीड़ा करना आरम्भ किया ॥३०॥

वन में मारे गये पिता का क्षण भर विचार कर दमने वपुष्मान् के केश पकड़ लिये और उसे भूमि पर पटककर तथा उसकी छाती पर घुटना धर कर हाथ उठा कर उच्च स्वर से कहा ॥३१॥

दम ने कहा—

सभी देवगण, मनुष्यगण, सिद्ध और पन्नगगण देखें, मैं इस क्षत्रियाधम वपुष्मान् का हृदय विदारण कर रहा हूँ ॥३२॥

मार्कण्डेय मुनि ने कहा :—

यह कह कर दमने तलवार से वपुष्मान् की छाती चीर दी। उसके रक्त से जब वह स्नान करने को उद्यत हुआ, तब देवताओं ने उसे रोक दिया ॥३३॥

फिर उसी के रक्त से दम ने पिता की उदक-क्रिया की, उसके मांस का पिता को पिण्ड प्रदान किया और शेष मांस राक्षस-कुल में उत्पन्न हुए ब्राह्मणों को खिला दिया। इस प्रकार पिता के ऋण से मुक्त होकर दम अपनी राजधानी में लौट आया ॥ ३४-३५ ॥

एवं विधा हि राजानो बभूवुः सूर्यवंशजाः ।
अन्येऽपि सुधियः शूरा यज्वानो धर्मकोविदाः ॥३६।

वेदान्तपारगांस्तांश्च न संख्यातुमिहोत्सहे ।
एतेषां चरितं श्रुत्वा नरः पापाद्विमुच्यते ॥३७।

इति श्रीमार्कण्डेयपुराणे दमचरितवर्णने वपुष्मन्निधनं नाम षट्त्रिंशत्यधिकशततमोऽध्यायः ॥ १३६ ।

सूर्य वंश में ऐसे अनेक बुद्धिमान्, शौर्यशाली, यागपरायण, धर्मवेत्ता और वेदान्त-पारग भूपति हुए हैं, जिनकी गणना करना सहज नहीं है। उनके चरित्र सुनने से मनुष्यों के सब पाप कट जाते हैं ॥३६-३७॥

इस प्रकार श्रीमार्कण्डेयपुराण का दमचरितवर्णन में वपुष्मन्-निधन नामक एक सौ छत्तीसवें अध्याय का हिन्दी अनुवाद सम्पूर्ण हुआ ।



सप्तत्रिंशत्यधिकशततमोऽध्यायः

पक्षिण ऊचुः—

इत्येवमुक्त्वा स मुनिर्मार्कण्डेयो महातपाः ।
विसृज्य क्रौष्टुकिञ्चापि चक्रे माध्याह्निकीः क्रियाः ॥१॥
अस्माभिश्च श्रुतं तस्माद्यत् ते प्रोक्तं महामुने ! ।
अनादिसिद्धमेतद्धि पुरा प्रोक्तं स्वयम्भुवा ॥२॥
मार्कण्डेयाय मुनये यदुक्तं कथितं तव ।
पुण्यं पवित्रमायुष्यं सर्वकामार्थसिद्धिदम् ॥३॥
पठतां शृण्वताञ्चापि सर्वपापैः प्रमुच्यते ।
आदावेव कृता ये च प्रश्ना हि चतुरस्त्वया ॥४॥
पितापुत्रस्य संवादस्तथा सृष्टिः स्वयम्भुवः ।
तथा मनूनामुत्पत्तीः राज्ञाञ्च चरितं मुने ॥५॥
अस्माभिरेतत् ते प्रोक्तं किमन्यच्छ्रोतुमिच्छसि ।
एतान् सर्वान् नरः शृण्वन् पठन्नपि सभासु च ।
विधूय सर्वपापानि ब्रह्मण्येव लयं व्रजेत् ॥६॥

पक्षियों ने कहा :—

महातपा मार्कण्डेय मुनि ने इस प्रकार कथा सुना कर क्रौष्टुकी को विदा किया और फिर मध्याह्न की क्रिया समाप्त की ॥१॥

हे महामुने ! मैंने जो आप से निवेदन किया यह अनादिसिद्ध पुराण स्वयम्भू ने मार्कण्डेय मुनि को सुनाया था वही हमने आपको सुनाया है। हमने यह जो मनोज्ञ पुण्यकर और पवित्र पुराण सुनाया, इसके पाठ या श्रवण से आयु की वृद्धि, सब कामनाओं की सिद्धि होती है ॥२-३॥

इसके पढ़ने और सुनने से मनुष्यों की सब पापों से मुक्ति होती है। आपने हमसे जो चार प्रश्न किये थे, पिता-पुत्र-संवाद, स्वयम्भू की सृष्टि, मनुष्यों की उत्पत्ति तथा राजाओं के चरित्र ये मैंने भलीभाँति सुना दिये हैं। अब आप और क्या सुनना चाहते हैं ? जो मैंने तुमको सुनाया, उसके सुनने और सभा-स्थल में सुनाने से श्रोता और पाठक दोनों सभी पापों से विमुक्त होकर ब्रह्म में लीन हो जाते हैं ॥४-६॥

अष्टादश पुराणानि यानि प्राह पितामहः ।
तेषां तु सप्तमं ज्ञेयं मार्कण्डेयं सुविश्रुतम् ॥७॥
ब्राह्मयं पाद्मं वैष्णवञ्च शैवं भागवतं तथा ।
तथान्यन्नारदीयञ्च मार्कण्डेयं च सप्तमम् ॥८॥
आग्नेयमष्टमं प्रोक्तं भविष्यं नवमं स्मृतम् ।
दशमं ब्रह्मवैवर्त्तं नृसिंहैकादशं तथा ॥९॥
वाराहं द्वादशं प्रोक्तं स्कान्दमत्र त्रयोदशम् ।
चतुर्दशं वामनकं कौर्मं पञ्चदशं तथा ॥१०॥
मात्स्यं च गारुडञ्चैव ब्रह्माण्डं च ततः परम् ।
अष्टादशपुराणानां नामधेयानि यः पठेत् ॥११॥
त्रिसन्ध्यं जपते नित्यं सोऽश्वमेधफलं लभेत् ।
चतुःप्रश्नसमोपेतं पुराणं मार्कण्डसंज्ञकम् ॥१२॥
श्रुतेन नश्यते पापं कल्पकोटिशतैः कृतम् ।
ब्रह्महत्यादिपापानि तथान्यान्यशुभानि च ॥१३॥
तानि सर्वाणि नश्यन्ति तूलं वाताहतं यथा ।
पुष्करस्नानजं पुण्यं श्रवणादस्य जायते ॥१४॥
बन्ध्या वा मृतवत्सा वा शृणोति यदि तत्त्वतः ।
सापि वै लभते पुत्रं सर्वलक्षणसंयुतम् ।
धनधान्यमवाप्नोति स्वर्गलोकं तथाक्षयम् ॥१५॥

पितामह ब्रह्मा ने अठारह पुराण सुनाये थे, उनमें से यह सुविख्यात मार्कण्डेय पुराण सातवाँ है। १—ब्रह्म, २—पद्म, ३—विष्णु, ४—शिव, ५—भागवत, ६—नारदीय, ७—मार्कण्डेय, ८—अग्नि, ९—भविष्य, १०—ब्रह्मवैवर्त, ११—नृसिंह, १२—वराह, १३—स्कन्द, १४—वामन, १५—कूर्म, १६—मत्स्य, १७—गरुड़ और १८—ब्रह्माण्ड, इन अठारह पुराणों का नाम जो व्यक्ति प्रतिदिन एक बार या तीनों समय जप करता है, उसे अश्वमेध के समान फल प्राप्त होता है ॥ ९-१२ ॥

चार प्रश्नों से युक्त इस मार्कंडेयपुराण के सुनने से सौ करोड़ कल्पों का किया हुआ पाप कट जाता है और ब्रह्महत्यादि समस्त महापाप तथा अमङ्गल आदि वायु के झकोरें से रुई के समान उड़ जाते हैं। पुष्कर में स्नान करने से जो पुण्य होता है, वही इस पुराण के श्रवण से प्राप्त होता है ॥ १३-१४ ॥

इसके श्रवण से इस लोक में धन, धान्य तथा परलोक में अक्षय्य स्वर्ग का लाभ होता है ॥ १५ ॥

सुरापश्चोग्रकर्मा च श्रुत्वैतत् सकलं नरः ।
सर्वपापविनिर्मुक्तः स्वर्गलोके महीयते ॥१६।
आयुरारोग्यमैश्वर्यं धनधान्यसुतादिकम् ।
वंशञ्चैव व्यवच्छेदी प्राप्नोति द्विजसत्तम ॥१७।
श्रुत्वैतत् सकलं विप्र यत् कुर्यात् तन्निशामय ।
अग्निं समाधाय ततो होमं कुर्याद्विचक्षणः ॥१८।
ध्यात्वा पुराणं गोविन्दं हृत्पद्मे मुनिसत्तम ।
पूजां वपुष्मतैर्वेद्यैर्गन्धमाल्याम्बरैस्तथा ॥१९।
वाचकन्तु सपत्नीकं पूजयेन्मुनिसत्तम ! ।
वाचकाय ततो देया गौः सवत्सा पयस्विनी ॥२०।
भूमिः शस्यवती विप्र ! हिरण्यं रजतं तथा ।
यथाशक्त्या च दातव्यं नृपैर्ग्रामादिवाहनम् ॥२१।
वाचकं तोषयित्वा तु स्वस्तीति समुदीरयेत् ।
अपूज्य वाचकं यस्तु श्लोकमेकं शृणोति हि ॥२२।
नासौ पुण्यमवाप्नोति शास्त्रचौरः स्मृतो बुधैः ।
न तस्य देवाः प्रीणन्ति पितरो नैव पुत्रकान् ॥२३।

सुरापान करनेवाले तथा अन्यान्य उग्र कर्म करनेवाले मनुष्य यदि इस पुराणको आद्योपान्त सुनें, तो वे सब पापों से छुटकारा पाकर स्वर्गलोक में पूजित होते हैं ॥ १६ ॥

हे द्विजोत्तम ! इसके सुनने से आयु, आरोग्य, ऐश्वर्य, धन, धान्य, पुत्र आदि की प्राप्ति होती है और सुनानेवाले का वंश अविच्छिन्न बना रहता है ॥ १७ ॥

हे विप्र ! इस पुराण को श्रवण करने पर जो करना पड़ता है, वह मैं सुनाता हूँ। समग्र पुराण सुन लेने पर विचक्षण व्यक्तिको अग्निस्थापन कर होम करना चाहिये ॥ १८ ॥

हे मुनिसत्तम ! हृदयकमल में पुराणरूपी गोविन्द का ध्यान कर और 'वपुष्मत' वेदमन्त्रों से गन्ध, माल्य, वस्त्र आदि से उनकी पूजा करे, (सपत्नीक) पुराणपाठक का सत्कार करना चाहिये । हे विप्र ! उसे सवत्सा गौ, उपजाऊ भूमि, सोना और चाँदी यथाशक्ति दान करना चाहिये। राजा श्रोता हो, तो वह गाँव-वाहनादि प्रदान करे। इस प्रकार कथावाचक को संतुष्ट कर उससे 'स्वस्ति' वाचन श्रवण करे। जो व्यक्ति वाचक का सत्कार न कर श्लोक भी सुन लेता है, उसको कोई पुण्य नहीं होता। ऐसे श्रोताओं को विद्वान् लोग शास्त्रचोर कहते हैं। देवता उनसे अप्रसन्न रहते हैं और

दत्तं श्राद्धं न चेच्छन्ति स्नानतीर्थफलं न च ।
लभते शास्त्रचौरोऽसौ निन्दितो वेदपाठकैः ॥२४॥

मार्कण्डेयसमाप्तौ तु ह्युत्सवं कारयेद् बुधः ।
धेनुं पयस्विनीं दद्यात् सर्वपापविमुक्तये ॥२५॥

वसनानि च रत्नानि सपत्नीकद्विजातये ।
कुण्डले कञ्चुकोष्णीषं शय्यां सोपस्करामपि ॥२६॥

सोपानत् करकं स्वर्ण-मुद्रिकां सप्तधान्यकम् ।
कांस्यपात्रं भोजनार्थं घृतपात्रसमन्वितम् ॥२७॥

एवं कृते द्विजश्रेष्ठ ! कृतकृत्यो भवेन्नरः ।
अश्वमेधसहस्रस्य राजसूयशतस्य च ॥२८॥

फलं वै समवाप्नोति श्रुत्वा सम्यग्विधानतः ।
न चैव यमभीतिः स्यान्न तस्य नरकाद् भयम् ॥२९॥

सर्वपापविनिर्मुक्तः कृतकृत्यो भवेन्नरः ।
अविच्छिन्नः सदा वंशो भविष्यति न संशयः ॥३०॥

स गच्छेदिन्द्रलोकं च ब्रह्मलोकं सनातनम् ।
च्युतस्ततः पुनर्नैव स भविष्यति मानवः ॥३१॥

पितृगण संतुष्ट नहीं होते है । उनका किया श्राद्ध पितर नहीं पाते और वेदपाठकों के द्वारा निन्दित उन शास्त्रचोरों को स्नान, तीर्थ आदिका भी फल नहीं मिलता ॥१९-२४॥

मार्कण्डेयपुराण का पाठ समाप्त होने पर बुधगण उत्सव करें और सब पापों से छुटकारा पाने के लिये सपत्नीक ब्राह्मणों को दूध देनेवाली, गाय, वस्त्र, रत्न, कुण्डल, चोली, पगड़ी, बिछौने के साथ पलङ्ग, जूते, कमण्डलु, सोने की मुद्रा, सप्तधान्य, भोजन के लिये घृतपात्र और काँसे की थाली प्रदान करें । हे द्विजश्रेष्ठ ! ऐसा करने से मनुष्य कृतकृत्य हो जाता है । यह पुराण जो विधिपूर्वक अच्छी तरह सुनते हैं, उन्हें सहस्र अश्वमेधों तथा सौ राजसूय यज्ञों का फल होता है । उनका यम-भय दूर हो जाता है, नरक-भय छूट जाता है, सब पापों से निवृत्ति होती है और एक ही साथ समग्र कुल पवित्र हो जाता है । निःसंदेह उनका वंश अविच्छिन्न रहता है और अन्त में उन्हें इन्द्रलोक तथा सनातन ब्रह्मलोक प्राप्त होने पर फिर वहाँ से गिरकर मनुष्य का शरीर नहीं प्राप्त करना पड़ता है ॥ २५-३१ ॥

पुराणश्रवणादेव परं योगमवाप्नुयात् ।
नास्तिकाय न दातव्यं वृषले वेदनिन्दके ॥३२।
गुरुविद्वेषके चैव तथा भग्नव्रतेषु च ।
पितृमातृपरित्यागे सुवर्णस्तेयिने तथा ॥३३।
भिन्नमर्यादके चैव तथैव ज्ञातिदूषके ।
एतेषां नैव दातव्यं प्राणैः कण्ठगतैरपि ॥३४।
लोभाद्वा यदि वा मोहाद् भयाद्वापि विशेषतः ।
पठेद्वा पाठयेद्वापि स गच्छेन्नरकं ध्रुवम् ॥३५।

जैमिनिरुवाच—

भारते नाभवद्यन्मे सन्देहस्फोटनं द्विजाः ।
तद्भवद्भिः कृतं मैत्रात् कश्चिदन्यः करिष्यति ॥३६।
यूयं दीर्घायुषः स्थोच्चैर्नीरोगा वृत्तिसंयुताः ।
सांख्ययोगे तथा चास्तु बुद्धिरव्यभिचारिणी ॥३७।
पितृशापकृताद्दोषाद्दौर्मनस्यं व्यपैतु वः ।
एतावदुक्त्वा वचनं स जगाम स्वमाश्रमम् ॥३८।

इस एकमात्र पुराण के सुनने से मनुष्यको उत्कृष्ट योग की प्राप्ति होती है। परन्तु यह पुराण कण्ठगत प्राण होने पर भी नास्तिक, शूद्र, वेदनिन्दक, गुरुद्वेष्टा, व्रतको भङ्ग करनेवाले, माता-पिताका त्याग करनेवाले, सोना चुरानेवाले, मर्यादाको तोड़नेवाले और ज्ञातिदूषक व्यक्ति को कदापि नहीं देना चाहिये, न सुनाना ही चाहिये। ऐसे व्यक्तियों में से यदि कोई लोभ, मोह अथवा भयके वशीभूत होकर इस पुराण का पाठ करे या किसी से पाठ कराकर सुने, या इन्हीं कारणों से ऐसे व्यक्तियों को कोई यह पुराण सुनाये, तो वह अवश्य ही नरक में चला जायेगा ॥ ३२-३५ ॥

जैमिनी मुनि ने कहा :—

हे पक्षियो ! महाभारत के अध्ययन से हमारे जो संदेह नहीं मिटे, वे तुमने सख्यभाव से मिटा दिये हैं। यह कार्य दूसरा कौन करेगा ! ॥ ३६ ॥

तुम बहुत दीर्घायु और नीरोग होकर वृत्ति सम्पन्न हो। तुम्हारी बुद्धि सांख्य-योग में अव्यभिचारणी हो और पितृ-शाप से उत्पन्न हुए दौर्मनस्य से तुम्हारा छुटकारा

चिन्तयन् परमोदारं पक्षिणां वाक्यमीरितम् ।
जैमिनिः सुमहाभागः पूजयित्वा द्विजोत्तमान् ॥३९॥

इति श्रीमार्कण्डेयपुराणे फलस्तुतिर्नाम सप्तत्रिंशत्यधिकशततमोऽध्यायः ॥१३७॥

हो। महाभाग जैमिनि ने यह कहकर और पक्षिरूपी द्विजश्रेष्ठ की पूजाकर उनकी सुनायी हुई उदार पुराण-कथापर विचार करते हुए अपने आश्रम की ओर चले गये ॥ ३७-३९ ॥



पर्यालोचन

प्रयोजन को देखकर ही मानव की प्रवृत्ति होती है। मार्कण्डेयपुराण में आद्यन्त दीप्ति की ही उपासना विहित है। सभी देवों की तेजःपुञ्ज के रूप में भगवती का आगमन होता है। उनकी आराधना के सावर्णिमनु की उत्पत्ति होती है। अन्य मनुओं की उत्पत्ति में भी अग्नि, आदित्य, गन्धर्वादि का शक्तिपात अपेक्षित देखा गया है। चित्त की निर्मलता के लिए जिन साधनों की अपेक्षा होती है, उनका निर्देश सुहृत्सम्मित वाक्यों से चरित्रों के द्वारा इस पुराण से उपलब्ध है। इसके वैशिष्ट्य की ओर दृष्टिपात करने पर यह कहने को बाध्य होना पड़ता है कि पुरुषोत्तम या मर्यादित मानव जीवन के गुणों की ही व्याख्या इसमें उपलब्ध है। वाक्सूक्त की व्याख्या एवं अखण्ड अदिति के द्वारा आदित्य की साधना तथा अग्नि देव के द्वारा चरम परम ज्ञान की उपलब्धि के द्वारा मानव-जीवन के साधक विषयों का सन्निवेश है। अठारह महापुराणों में यह सातवाँ महापुराण है। जीवन के साफल्य के लिए प्रत्येक गृह में इसके कतिपय अध्यायों की आवृत्ति होती है। इस पुराण के उपदेश के अनुसार यदि जीवन यात्रा का निर्वाह किया जाय तो पुरुषोत्तम भूमिका में मानव जीवन का यापन हो सकता है।

इस प्रकार श्रीमार्कण्डेयपुराण का पुराणमाहात्म्यकीर्तन नामक एक सौ सैंतीसवें अध्याय का सपर्यालोचन हिन्दी अनुवाद सम्पूर्ण हुआ।





